# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## अच्सन्धिप्रकरणम् (४)

२५.०८.२०१०

# पुनरावर्तनम्

- द्वित्वप्रकरणम्
  - अचो रहाभ्यां द्वे
  - अनचि च
    - यणो मयो द्वे वाच्ये
  - नादिन्याक्रोशे पुत्रस्य
    - तत्परे च
    - वा हतजग्धयोः
  - त्रिप्रभृतिषु शाकटायनस्य
  - सर्वत्र शाकल्यस्य
  - दीर्घादाचार्याणाम्
- एचोऽयवायावः

- हरे+ए = हरये
- विष्णो+ए = विष्णवे
- नै+अकः = नायकः
- पौ+अकः = पावकः

- वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये (रघु)
- मय्यावेश्य मनो ये माम् (गीता)
- हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा (रघु)
- धनुष्यमोघं समदत्त सायकम् (रघु)
- ज्ञानी त्वात्मैव मे मतम् (गीता)

- वागर्थौ+इव
- मयि+आवेश्य
- हि+अग्नौ
- धनुषि+अमोघं
- तु+आत्मैव

- येन केनाप्युपायेन शुभेनाप्यशुभेन वा (पञ्च)
- आदित्यचन्द्रावनिलानलौ च
- नैतत् त्वय्युपपद्यते (गीता)
- शास्त्रेष्वकुण्ठिता बुद्धिः (रघु)
- द्वाविमौ पुरुषौ लोके (गीता)

- केनापि+उपायेन
- शुभेनापि+अशुभेन
- आदित्यचन्द्रौ+अनिलानलौ
- त्वयि+उपपद्यते
- शास्त्रेषु+अकुण्ठिता
- द्वौ+इमौ

| | |
|---|---|
| ☙ वपुर्विशेषेष्वतिगौरवाः क्रियाः (कुमार) | ☙ वपुर्विशेषेषु+अतिगौरवाः |
| ☙ विद्युदैरावताविव (रघु) | ☙ विद्युदैरावतौ+इव |
| ☙ श्रुतेरिवार्थं स्मृतिरन्वगच्छत् (रघु) | ☙ अनु+अगच्छत् |
| ☙ गुर्वपि विरहदुःखमाशाबन्धः साहयति (शाकु) | ☙ गुरु+अपि |
| ☙ सह नाववतु (शान्तिमन्त्रः) | ☙ नौ+अवतु |

- धीनामवित्र्यवतु (वेदः)
- अवित्री+अवतु
- आत्मन्यप्रत्ययं चेतः (शाकु)
- आत्मनि+अप्रत्ययं
- आत्मन्यवज्ञां शिथिलीचकार (रघु)
- आत्मनि+अवज्ञां
- सागरमुज्झित्वा कुत्र वा महानद्यवतरति (शाकु)
- महानदी+अवतरति
- विनश्यत्स्वविनश्यन्तम् (गीता)
- विनश्यत्सु+अविनश्यन्तम्

अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् (शाकु)

देवो देवापगां वोढुमन्वमंस्त दयानिधिः (चम्पू.रा)

मूर्ध्न्याधायात्मनः प्राणम् (गीता)

तेजस्वि नावधीतमस्तु (शान्तिमन्त्रः)

अज्ञातहृदयेषु+एवम्

अनु+अमंस्त

मूर्ध्नि+आधायात्मनः

नौ+अधीतमस्तु

# ६३. वान्तो यि प्रत्यये (६.१.७९)

- पदत्रयम् ।
- वान्तः – प्रथमा = विधेयः = वकारान्तः (अव्, आव् च) आदेशो भवति ।
- यि प्रत्यये – सप्तमी = यकारादौ प्रत्यये परे (तस्मिन्निति निर्दिष्टे पूर्वस्य)
- स्थानी पूर्वसूत्रेण लभ्यते – ओकारः, औकारश्च ।
- यकारादौ प्रत्यये परे ओदौतोः अव्, आव् एतौ स्तः ।

- गोर्विकारः
- गो यत् (गोपयसोर्यत् – ४.३.१६०)
- गो य (हलन्त्यम् – १.३.३, तस्य लोपः – १.३.९)
- गव् य (वान्तो यि प्रत्यये – ६.१.७९)
- गव्यम्

- नावा तार्यम्
- नौ यत् (नौ-वयो-धर्म-विष-मूल-मूल-सीता-तुलाभ्यः तार्य-तुल्य-प्राप्य-वध्य-अनाम्य-सम-समित-संमितेषु – ४.४.९१)
- नौ य (हलन्त्यम् – १.३.३, तस्य लोपः – १.३.९)
- नाव् य (वान्तो यि प्रत्यये – ६.१.७९)
- नाव्यम्

# गोर्यूतौ छन्दस्युपसंख्यानम् (वा)

- छन्दसि = वेदे
- गोः – षष्ठी = गोशब्दस्य स्थाने
- यूतौ – सप्तमी = यूतिशब्दे परे
- वान्तः – प्रथमा = विधेयः = वकारान्तः आदेशः स्यात् (अव्)
- वेदे यूतिशब्दे परे गोशब्दावयवस्य ओकारस्य स्थाने अव् इति वान्तादेशो भवति ।

❧ गो यूतिः

❧ गव् यूतिः

❧ गव्यूतिः (= गोप्रचरभूमिः)

❧ उदा: आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् ।

# अध्वपरिमाणे च (वा)

- अध्वा = मार्गः, परिमाणम् = प्रमाणम् ।
- मार्गपरिमाणविशेषे गम्येऽपि यूतिशब्दे परे गोशब्दावयवस्य ओकारस्य स्थाने अव् इति वान्तादेशो भवति । अयं लोकेऽपि साधुः ।
- 'गव्यूतिः स्त्री क्रोशयुगम्' इत्यमरः ।

- यूतिः – ’यु मिश्रणामिश्रणयोः’ धातोः क्तिन् प्रत्ययः ।
- यु क्तिन् (’स्त्रियां क्तिन्’ – ३.३.९४)
- यु ति (लशक्वतद्धिते – १.३.८, हलन्त्यम् – १.३.३, तस्य लोपः – १.३.९)
- यू ति (दीर्घः - ???)
- दीर्घविधायकं सूत्रं नास्ति ।
- ’ऊति-यूति-जूति-साति-हेति-कीर्तयश्च’ ३.३.९७ सूत्रे पाणिनिना यूतिशब्दः निपात्यते ।
- सिद्धप्रक्रियस्य निर्देशो निपातनम् ।

गव् यूतिः – लोपः शाकल्यस्य (८.३.१९) इति सूत्रेण, हलि सर्वेषाम् (८.३.२२) इति सूत्रेण वा वकारस्य लोपो भवतु इत्याशङ्का । अवर्णपूर्वयोः पदान्तयोः यकार-वकारयोः अशि परे वा लोपः, हलि परे नित्यं लोपः इति सूत्रार्थः ।

गो यूति

पदम्

| | | | |
|---|---|---|---|
| ग् | अ | व् | यूति |
| | अवर्णः | पदान्तः | हल् |

- वकारप्रश्लेषः
- व् वान्तो यि प्रत्यये गोर्यूतौ व् छन्दस्युपसंख्यानम्
- वान्तो यि प्रत्यये (लोपो व्योर्वलि इति वकारलोपः) गोर्यूतौ छन्दस्युपसंख्यानम्

- वान्तः इत्यत्र वकारात्, गोर्यूतौ इत्यत्र छकाराद्वा पूर्वभागे 'लोपो व्योर्वलि' इति लोपेन वकारः प्रश्लिष्यते । तेन श्रूयमाणवकारान्तः आदेशः स्यात् । वकारो न लुप्यत इति यावत् ।

# ६४. धातोस्तन्निमित्तस्यैव (६.१.८०)

- पदत्रयम् । धातोः, तन्निमित्तस्य, एव ।
- 'वान्तो यि प्रत्यये' इति अनुवर्तते ।
- नियमसूत्रम् ।
- सिद्धे सति आरभ्यमाणो विधिः नियमाय भवति ।

- लूञ् छेदने
- लू यत् (अचो यत् – ३.१.९७)
- लू य  (हलन्त्यम् – १.३.३, तस्य लोपः – १.३.९)
- लो य ('सार्वधातुकार्धधातुकयोः' ७.३.८४ – इति गुणः)
- लव् य – 'वान्तो यि प्रत्यये' इत्यनेनैव अवादेशः प्राप्नोति ।

## यादौ प्रत्यये परे धातोः चेद् वान्तादेशः तर्हि तन्निमित्तस्यैव ।

- धातोः ओकारः औकारः वा प्रत्ययनिमित्तः चेदेव वान्तादेशः इति नियमः ।
- लूञ्  छेदने
- लू यत् (अचो यत् – ३.१.९७)
- लू य (हलन्त्यम् – १.३.३, तस्य लोपः – १.३.९)
- लो य ('सार्वधातुकार्धधातुकयोः' ७.३.८४ – इति गुणः) – प्रत्ययं निमित्तीकृत्य धातोः ऊकारस्य औकारादेशः ।
- लव् य ('धातोस्तन्निमित्तस्यैव' ६.१.८०)
- लव्यम्

- लू ण्यत् ('ओरावश्यके' ३.१.१२५ )
- लू य ('चुटू' १.३.७, हलन्त्यम् – १.३.३, तस्य लोपः – १.३.९)
- लौ य ('अचो ञ्णिति' इति वृद्धिः – ७.२.११५)
- लाव् य ('धातोस्तन्निमित्तस्यैव' ६.१.८०)
- लाव्यम्
- अवश्यं लाव्यम् – अवश्यलाव्यम् ।

## ’तन्निमित्तस्यैव’ किम्?

- ओयते
- वेञ् तन्तुसन्ताने
- आ वे - कर्मणि लट्
- आ वे य ते
- आ उ ए य ते (’वचिस्वपियजादीनां किति’ ६.१.१५ – इति वकारस्य सम्प्रसारणम् उकारः)
- आ उ य ते (’सम्प्रसारणाच्च’ ६.१.१०८ – इति पूर्वरूपम्)
- ओ य ते (’आद्गुणः’ ६.१.८७ – इति आकार-उकारयोः गुणः ओकारः) – अयं गुणः न प्रत्ययनिमित्तः
- ओकारः न ’तन्निमित्तः’ । तस्मादिह अवादेशो न भवति ।

- औयत
- वे कर्मणि लङ्
- आ वे य त
- आ उ ए य त ('वचिस्वपियजादीनां किति' ६.१.१५ – इति वकारस्य सम्प्रसारणम् उकारः)
- आ उ य त ('सम्प्रसारणाच्च' ६.१.१०८ – इति पूर्वरूपम्)
- औ य त ('आटश्च' ६.१.९० – इति आकार-उकारयोः वृद्धिः औकारः) – इयं वृद्धिः न प्रत्ययनिमित्ता
- औकारः न 'तन्निमित्तः' । तस्मादिह आवादेशो न भवति ।